।। श्री गुरुभ्यो नमः ।।

# ।। यतिप्रणवकल्पः।।

।। हरि ॐ ।।

समिच्चर्वाज्यकान् हुत्वा सम्यक् पुरुषसूक्ततः।

सर्वेषामभयं दत्वा विरक्तः प्रव्रजेद्धरिम् ।।1।।

श्रुत्वा भागवतं शुद्धं आचार्यं शरणं व्रजेत् ।

अधीहि भगवो ब्रह्मेत्यस्मै ब्रूयात् गुरुः परम् ।।2।।

उच्चारयेत् त्रिशस्तारं दक्षिणे श्रवणे तथा ।

ऋषिच्छंदोदैवतानि ब्रूयात् तस्य क्रमात् सुधीः ।।3।।

अंतर्यामी तु गायत्री परमात्मेत्यनुक्रमात् ।

विश्वश्च तैजसः प्राज्ञः तुर्यश्चाक्षरदेवताः ।।4।।

कृष्णो रामो नृसिंहश्च वराहो विष्णुरेव च ।

परंज्योतिः परंब्रह्म वासुदेव इति क्रमात् ।।5।।

अकारादेस्तथा शांतातिशांतस्यदेवताः ।

ऐवमुक्त्वा तु तद्ध्यानं ब्रूयाद्भक्ताय सद्गु रुः ।।6।।

अष्टपत्रे तु हृत्पद्मे मध्ये सूर्येंदुवह्निगम् ।

पीठं तत्पद्ममध्यस्थं नारायाणमनामयम् ।।7।।

उद्यदादित्यसंकाशं तेजसानुपमं सदा ।

सहस्रेणापि सूर्याणां सज्ज्ञानरूपिणम् ।।8।।

अतिरक्ततलं भास्वन्नखव्रातविभूषितम् ।

वृत्तजंघं वृत्तजानुं हस्तिहस्तोरुमीश्वरम् ।।9।।

महाकटितटाबद्ध-कांचीपीतांबरोज्वलम् ।

सुनिम्ननाभिं त्रिवलिं सुवृत्तोदरबंधनम् ।।10।।

विशालवक्षसं भ्राजात् कौस्तुभामुक्तकंघरम् ।

वनमालाधरं हारवैजयंत्यादिभिर्युतम् ।।11।।

पृथुदीर्घचतुर्भाहुं चक्रशंखगदांबुजैः ।

युक्तमुन्निद्रपद्माक्षं स्फुरन्मकरकुंडलम् ।।12।।

पूर्णचंद्रायुतोद्रिक्त-कांतिमन्मुखपंकजम् ।

सुभ्रुवं सुललाटांतं किरीटाबद्धमूर्धजम् ।।13।।

निःशेषदुःखशमनं नित्यानन्दं शुचिस्मितम् ।

विश्वादींश्चैव कृष्णादीन् एवंभूतान् सनातनान् ।।14।।

अभिन्नानेव सततं तस्माद् विष्णोः परात्मनः ।

वराभयोद्यतकरान् नित्यानंदैकरूपिणः ।।15।।

एवमुक्त्वा गुरुर्ध्यानं शपथं कारयेत्ततः ।

न विष्णुं वैष्णवांश्चैव विसृजेयमिति त्रिशः ।।16।।

नचान्यदेवतासाम्यं तदैक्यमथवा हरेः ।

चिन्तयेयं मृतोवापि नचाप्येकत्ववादिभिः ।।17।।

समत्ववादिभिर्वाहं संगच्छेयं कदाचन।

तन्निंदकैश्च तद्भक्तनिंदकैर्वा महामुने ।।18।।

एवं कृते तु शपथेः मस्तके हस्तपंकजम् ।
निधायोत्तीर्यसंसारात् सखीभव हरेः प्रियः ।।19।।
सर्वदुःखादिभिर्मुक्तः नित्यानंदैकरूपकः।
संप्राप्य विष्णुसामीप्यं तत्रापि हरिभक्तिमान् ।।20।।
भक्तिमांश्चान्यदेवेषु तारतम्यं च संस्मरन् ।
सर्वोत्कर्षं स्मरन् विष्णोः भूयाश्चैव सदा सुखी ।।21।।
नमुक्तौ विष्णुनैक्यंवा मुक्तानां साम्यमेव वा ।
स्मरेथा इति चोक्त्वाथ समयाननु शिक्षयेत् ।।22।।
नित्यशश्च हरेः पूजा जपध्यान समर्पणम् ।
कर्तव्यं तु त्वया वत्स जपश्च त्रिसहस्रकः ।।23।।
मध्यमः प्रणवस्योक्तः योऽवरः ससहस्रकः ।
त्रिसहस्रात्परो यस्तु स उत्तमजपः स्मृतः ।।24।।
आत्मानं प्रतिबिंबत्वे ध्यायन्बिम्बं जनार्दनम् ।
ध्यायस्व सततं वत्स सपर्यां नित्यशः कुरु ।।25।।
मानसैर्वाथ पुष्पैर्वा प्रणवेन समाहितः ।
अन्यांश्च वैष्णवान् मंत्रान् जपेथा भक्तिपूर्वकम् ।।26।।
श्रुणुष्व वैष्णवंशास्त्रं सदा वेदार्थतत्परः ।
वेदान्मन्त्रानुपनिषत्सहितान् सर्वदा श्रुणु ।।27।।
इतिहासं पुराणं च पंचरात्रं तथैवच ।
तदर्धान् ब्रह्मसूत्रैश्च सम्यङ्निर्णीय तत्वतः ।

विष्णोः सर्वोत्तमत्वं च सर्वदा प्रतिपादय ।।28।।

इति श्रीमदानंदतीर्थ भगवत्पादाचार्यविरचितः

यतिप्रणवकल्पः समाप्तः

। श्रीकृष्णार्पणमस्तु ।